— जरयमाणः, जरीष्यमाणः ; जीः-जिरौ-जिरः ; —

[1]अनुजीर्णः, जीर्णः-जीर्णम्[A]-जीर्णवान् , जरितः-तवान् ;

जरः, [2]जरन्[B], जरः ; जरीतव्यम्-जरितव्यम् , जरयितव्यम् ;

जरणीयम् , जरणीयम् ; [3]अजर्यम्[C](सङ्गतम् ) जार्यम्, जर्यम् ;

ईषज्जरः-दुर्जरः-सुजरः ; — जीर्यमाणः, जर्यमाणः;

जारः, [4]जारः ; जरीतुम्-जरितुम् , जरयितुम् ;

[5]जरा,[D] जरणा ; जरणम् , जरणम् ;

जरीत्वा-जरित्वा, जरयित्वा ; प्रजीर्य, [6]प्रजरय्य ;

जारम् २ } [7]जरम् १-जारम् २ ; }
जरीत्वा २-जरित्वा २ } जरयित्वा २. }

---

1. 'गत्यर्थाकर्मकश्लिषशीङ्स्थाऽऽसवसजनरुहजीर्यतिभ्यश्च' (3-4-72) इत्यनेन 'अनुजीर्णो वृषलीं देवदत्तः' इत्यत्र कर्तरि क्तप्रत्ययो भवति ।

2. 'जीर्यतेरतृन् ' (3-2-104) इति ताच्छीलिक अतृन् प्रत्ययः ।

3. 'अजर्यं सङ्गतम् ' (3-1-105) इति सूत्रेण नञुपसृष्टादस्माद्धातोः सङ्गतं चेद्विशेष्यं, कर्तरि यत् प्रत्ययो निपात्यते । अन्यत्र 'ऋहलोः—' (3-1-124) इति ण्यति जार्यम् इत्यपि भवति ।

4. 'दारजारौ कर्तरि, णिलुक् च, (वा. 3-3-20) इति ण्यन्तात् कर्तरि घञि' णिलुकि, घञ्निमित्तिकोपधावृद्धिः । 'मितां ह्रस्वः' (6-4-92) इति ह्रस्वस्तु नात्र प्रवर्तते ; णेर्लुका लुप्तत्वेन स्थानिवत्त्वाभावात् । 'जरयति=सुरतैः ग्लपयति इति जारः=उपपतिः ।' इति प्रक्रियासर्वस्वे ।

5. षित्त्वेन, 'षिद्भिदादिभ्योऽङ्' (3-3-104) इत्यङि, 'ऋदृशोऽङि गुणः' (7-4-16) इति गुणः ।

6. 'ल्यपि लघुपूर्वात् ' (6-4-56) इति णेरयादेशः ।

7. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ' (6-4-93) इति णमुल्परे णौ उपधायाः दीर्घविकल्पः ।

A. 'देहि प्रभोः प्रेष्य सुसोढनाय मे जीर्णांशुकायः त्वमजीर्णमंशुकम् ॥' धा. का. 2.57.
B. 'यज्वभिः सुत्वभिः पूर्वैर्जरद्भिश्च कपीश्वर ॥' भ. का. 6. 134.
C. 'तेन सङ्गतमार्येण रामाजर्यं कुरुद्रुतम् ।' भ. का. 6. 54.
D. 'तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना ॥' रघुवंशे—1. 23.